क्र. २३

संस्कृत

स्तोत्र

शिवस्तोत्र

श्लोक. २११

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥श्री॥

श्रीगणेशाय नमः ॥ ॐ ॥ जय शंकर पार्वतीपते मृड शंभो शशिखंड
मंडन ॥ मदनांतक भक्तवत्सल प्रियकैलास दयासुधांबुधे
॥ सदुपायकथास्वपंडितो हृदये दुःखशरेण खंडितः ॥ शशि
खंडशिखंडमंडनं शरणं यामि शरण्यमीश्वरं ॥१॥ महतः
परितः प्रसर्पतस्तमसो दर्शनभेदिनो भिदे ॥ दिनना
थ इव स्वतेजसा हृदयव्योम्नि मनागुदेहि नः ॥२॥ न
वयं तव चर्मचक्षुषा ~~सकलेनेश विलोकयाशु नः~~ प
पदवीमप्युपवीक्षितुं क्षमाः ॥ कृपयाभयदेन चक्षुषा स
कलेनेश विलोकयाशु नः ॥४॥ त्वदनुस्मृतिरेव पाव
नी स्तुतियुक्ता न हि वक्तुमीश सा ॥ मधुरं हि पयः स्वभा
वतो ननु कीदृक्सितशर्करान्वितं ॥५॥ सविषोप्यमृ
तायते भवाञ्छवमुंडाभरणोपि पावनः ॥ भव एव भ
वांतकः सतां समदृष्टिर्विषमेक्षणोपि सन् ॥६॥ अ

(1A)

पि मूलधरामयो हृदो वैराग्यरतोपि दुराप्य वासनं ॥ अपि
भैक्ष्यचरो महेश्वरश्चरितं चित्रमिदं हि ते प्रभो ॥७॥
वितरत्यभिवांछितं दृशा परिदृष्टः किल कल्पपादपः ॥ हृदये
स्मृत एव धीमते नमतेभीष्टफलप्रदो भवान् ॥८॥ सहसैव
भुजंगपाशवान्विनिगृह्णाति न यावदंतकः ॥ अभयं कुरु
तावदाशु मे गतजीवस्य पुनः किमौषधैः ॥९॥ सविषैरिव
भीमपन्नगैर्विषयैरेभिरलं परिक्षतं ॥ अमृतैरिव सं
भ्रमेण मामभिषिंचाशु दयावलोकनैः ॥१०॥ मुनयो बहु
वोघ्य धनत्वां गमितास्त्वाभिमतार्थलाभतः ॥ करुणा
करयेन तेन मामवसन्नं ननु पश्य चक्षुषा ॥११॥ प्रण

(1B)

मामि यथा यथाचापर शरणं कः कृपया भयप्रदा ॥ वि
रहीव विभो प्रियामयं परिपश्यामि भवन्मयं जगत्
॥१२॥ बहवो भवतानुकंपिताः किमितीशान न मानुकंपसे
दधता किमु मंदराचलं परमाणुः कमठेन दुर्धरः ॥१३॥
अशुचिं यदि मानुमन्यसे किमिदं मूर्ध्नि कपालदाम ते
उत शाठ्यमसाधुसंगिनं विषलक्ष्मासि न किं द्वि
जिह्वधृक् ॥१४॥ क्व दृशं विदधामि किं करोम्यनुतिष्ठा
मि कथं भयाकुलः ॥ क्व नु तिष्ठसि रक्ष रक्ष मामयि
शंभो शरणागतोस्मि ते ॥१५॥ विलुठाम्यवनौ किमा

(1C)

कुलः किमुरो हन्मि शिरश्छिनद्मि वा ॥ किमु रोदि
मि रारटीमि किं कृपणं मां न यदीक्षसे प्रभो ॥१६॥ शिव
सर्वग शर्व शर्मद प्रणतो देव दयां कुरुष्व मे ॥ नम ई
श्वर नाथ दिक्पते पुनरेवेश नमो नमोस्तु ते ॥१७॥
शरणं तरुणेंदुशेखरः शरणं मे गिरिराजकन्यका ॥ श
रणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतं ॥१८॥ उ
पमन्युकृतं स्तवोत्तमं जपतः शंभुसमीपवर्तिनः ॥
अभिवांछितभाग्यसंपदः परमायुः प्रददाति शंकरः

(1D)

॥१९॥ उपमन्युकृतं स्तवोत्तमं प्रजपेद्यस्तु शिवस्य संनि
धौ ॥ शिवलोकमवाप्य सोचिरात् सह तेनैव शिवेन
मोदते ॥२०॥ श्रीशंकरार्पणमस्तु

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com